Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences ISSN: 2581-6241 Volume - 4, Issue - 9, Sept - 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Received on : 13/09/2021 Accepted on : 27/09/2021 Publication Date: 30/09/2021

# विनियोगप्रतिपादकानां षडङ्गताग्राहकप्रमाणानां परामर्शः

**Dr.Vigneshwar Bhat**
Asst. Professor, Department of languages
Amrita Vishwa Vidyapeetham, Mysuru Campus ,India
Email - vigneshwarbhat@ymail.com

**पीठिका :** मुख्यफलाजनकत्वे सति मुख्यफलजनकव्यापारजनकत्वम् अङ्गपदवाच्यम् । जैमिनिनापि "शेषः परार्थत्वात्" (जै.सू.३.१.२) इत्यनेन सूत्रेण अङ्गं लक्षितम् । यदुद्देशप्रवृत्तकृतिकारकत्वेन विहितं यत्तत्वं तदङ्गत्वमिति भाट्टदीपिकोक्तलक्षणम् (भा.दी.३.१.२) । अङ्गानां साक्षात् फलं नास्ति । अपि तु फलप्रयोजकप्रधानकर्मणां उपकारकत्वम् अस्ति । यथा दर्शपूर्णमासाङ्गत्वेन विहितानि प्रयाजाद्यङ्गानि । प्रयाजानां साक्षात् फलं नास्ति । परन्तु दर्शपूर्णमासयागाः तैर्विना फलसाधने अक्षमाः भवन्ति । तस्मात् तेषां प्रधानोपकारकत्वं फलं भाव्यम् । विना प्रमाणं प्रमा नोपलभ्यते इतिकृत्वा अङ्गत्वबोधकानि षट् प्रमाणानि उपपाद्यन्ते । तानि च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि ।

**बीजाक्षराणि** : विधि, विनियोगः, शेषत्वम्, शेषी, अङ्गम्, प्रधानम्, श्रुतिः,लिङ्गम्, वाक्यम्, प्रकरणम्, स्थानम्, समाख्या।

## 1. प्रस्थावना :

मीमांसा नाम वाक्यार्थविचारः । " मान पूजायामम् " (पाधा.पा.१८४३) इत्यस्मात् धातोः जिज्ञासार्थक- सन् प्रत्यये सति उत्पन्नोऽयं मीमांसा शब्दः । अत एव विचारं ब्रूते । अस्ति काचित् प्रसिद्धिः मीमांसाप्रवर्तकः जैमिनिरिति । सः प्रवर्तकः न तु मीमांसाकर्ता । जैमिनेः प्रागपि इयं मीमांसा आसीदिति केषुचित् ग्रंथेषु श्रूयते । तद्यथा "ब्रम्हा प्रजापतये मीमांसां प्रोवाच सोऽप्यग्नये सोऽपि इन्द्राय स च वसिष्ठाय सोऽपि पराशराय पराशरः कृष्णद्वैपायनाय सोऽपि जैमिनये स्वोपदेशादनन्तरम् अमुं न्यायं सूत्ररूपेण निबद्धवानिति" सिद्धान्तचन्द्रिकायां श्रूयते ।

महर्षिणा जैमिनिना सूत्रजालमीमांसा प्रत्यपादीति अविवादः । अतश्च मीमांसा प्रवर्तकः जैमिनिरिति आमनन्ति । वेदवाक्यानां विज्ञानाय पुनरनेके नियमाः स्वकीये शास्त्रे जैमिनिना उपस्थापिताः । श्रुत्यर्थावगतये ये नियमाः अपेक्षितास्ते सर्वे महर्षिणा समुपस्थापिताः । शास्त्रेऽस्मिन् सन्ति द्वादशा अध्यायाः । अतोऽस्य शास्त्रस्य अस्ति नामधेयान्तरं "द्वादशलक्षणी" इति । द्वादशसु अध्यायेषु प्रतिपाद्यो विषयः धर्मः । लौकिकवाक्यानामपि चिन्तनमस्मिन् सङ्गतम् । प्रत्यध्याये विभिन्नो विषयः विचारितः। अस्य सूत्रजालस्य शबरस्वामिनः भाष्यसौकर्यम् अध्ययनेच्छाम् उन्मुखीकरोति । कुमारिलभट्टानां श्लोकवार्तिकं , तन्त्रवार्तिकं , टुप्टीका च अध्ययनेच्छां द्विगुणीकरोति । पार्थसारथिमिश्राणां शास्त्रदीपिकायां कृत्स्नं जैमीनीयसूत्रं विचारितम् वर्तते । खण्डदेवाचार्यैः भाट्टदीपिका विरचिता वर्तते । एवम् अनेकेषां तत्वज्ञानां विवेचकानां च व्याख्या मीमांसाशास्त्रे उपलभ्यते । अध्यायविभागे हेतुः कः? इति जिज्ञासायां धर्मावगमने अपेक्षितानि साधनानि तद्भेदबोधके हेतवः भवन्ति । प्राथम्ये अध्यायविभागः एवं श्रूयते ।

धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्रलक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकः ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रञ्च प्रसङ्गश्चोदिताः क्रमात् ॥ ( जै.न्या.वि १.१.६,७ )

धर्मः द्वादशलक्षणैः व्युत्पादितः । "विना प्रमाणं प्रमा नोपगच्छति" अतः धर्मे प्रमाणं विचारितं प्रथमाध्याये । द्वितीये षट्कर्मभेदबोधकप्रमाणैः कर्मणां भेदः प्रतिपाद्यते । तृतीये शेषी शेषेण निष्पद्यते , अर्थात् फलदायकः भवति इति धिया श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यैः षड्भिः प्रमाणैः शेषत्वं निरूपितम् ।

निरूपिते भेदे तदनुष्ठानोपयोगितया विनियोगः विचिन्त्यते । अङ्गाङ्गिनोः सम्बन्धबोधकः विधिः विनियोगपदवाच्यः । सर्वाङ्गविशिष्टं कर्म अङ्गिपदेन व्यवह्रियते । अङ्गे निरूपिते अङ्गी अनुनिष्पद्यते इति कृत्वा अङ्गमेवात्र निरूप्यते।

## 2. शेषत्वनिरूपणम् -

मुख्यफलाजनकत्वे सति मुख्यफलजनकव्यापारजनकत्वम् अङ्गपदवाच्यम् । जैमिनिनापि "शेषः परार्थत्वात्"(जै.सू.३.१.२) इत्यनेन सूत्रेण अङ्गं लक्षितम् । यदुद्देशप्रवृत्तकृतिकारकत्वेन विहितं यत्तत्वं तदङ्गत्वमिति भाट्टदीपिकोक्तलक्षणम् (भा.दी.३.१.२) । अङ्गानां साक्षात् फलं नास्ति । अपि तु फलप्रयोजकप्रधानकर्मणां उपकारकत्वम् अस्ति । यथा दर्शपूर्णमासाङ्गत्वेन विहितानि प्रयाजाद्यङ्गानि ।

Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences ISSN: 2581-6241 Volume - 4, Issue - 9, Sept - 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Received on : 13/09/2021 Accepted on : 27/09/2021 Publication Date: 30/09/2021

प्रयाजानां साक्षात् फलं नास्ति । परन्तु दर्शपूर्णमासयागाः तैर्विना फलसाधने अक्षमाः भवन्ति । तस्मात् तेषां प्रधानोपकारकत्वं फलं भाव्यम् । विना प्रमाणं प्रमा नोपलभ्यते इतिकृत्वा अङ्गत्वबोधकानि षट् प्रमाणानि उपपाद्यन्ते । तानि च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि ।

**3. श्रुतिनिरूपणम् -**

तत्र प्रथमं प्रमाणं श्रुतिः । प्रमाणान्तरनिरपेक्षो रवः श्रुतिः । यथा "दध्ना जुहोति" (मै.सं.४.७.७) इति । अत्र प्राप्ताग्निहोत्रानुवादेन तदङ्गत्वेन दधि विधीयते । होमाङ्गत्वं तावत् , दध्ना इत्यत्र विद्यमानया तृतीयया विज्ञायते । सा च प्रमाणान्तरनिरपेक्षा स्वयमेव होमाङ्गत्वम् उपपादयति । एवमेव यदाहवनीये जुहोति , व्रीहीन् प्रोक्षति इत्यादावपि विज्ञेयम् ।

**4. लिङ्गनिरूपणम् -**

द्वितीयमङ्गताग्राहकं प्रमाणांङ्गम् । " सामर्थ्यं सर्वभावानांङ्गमित्यभिधीयते " । "स्रुवेण जुहोति" (तै.सं.६.१.२) इत्यत्र अर्थसामर्थ्यात् "स्रुवेण द्रवद्रव्यं जुहोति " इति अर्थाङ्गेन स्रुवस्य द्रवद्रव्यहोमसाधनत्वम् अभ्युपगम्यते । एवं "बर्हिर्देवसदनं दामि "(मै.सं.१.१.४) इत्यस्मिन् मन्त्रे विद्यमानबर्हिशब्देन कुशोत्पाटकोऽयं मन्त्र इति विज्ञायते । तथा च कुशच्छेदनस्यैव अङ्गं भवति अयं मन्त्रः। न च जघन्यवृत्याश्रयणेन उलपराजिलवनाङ्गम् । यत्र एकेन शब्देन अनेकार्थोपस्थितिः तत्र मुख्यार्थे एव विनियोगः ज्ञेयः ।

**5. वाक्यनिरूपणम् -**

यत् पदानि संहत्य अर्थमभिदधति तद्वाक्यम् । "समभिव्याहारो वाक्यमिति तस्य लक्षणम्" । सहोच्चारणमात्रेण अङ्गाङ्गिभावोऽवगम्यते तत्र वाक्यीयो विनियोगः विज्ञेयः । "यस्य पर्णमयीजुहूर्भवति न स पापं श्लोकं श्रुणोति"(तै.सं.३.५.७) इत्यत्र पर्णस्य जुह्वङ्गत्वम् अभ्युपगम्यते समभिव्याहारादेव । पर्णतया जुह्वा हविरवदाने अपूर्वप्राप्तिं प्रतिजानिते इदं वाक्यम् ।

**6. प्रकरणनिरूपणम् -**

एवं चतुर्थं प्रमाणं प्रकरणम् । उभयाकांक्षा प्रकरणम् । यथा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यत्र विहितस्य दर्शपूर्णमासनामकस्य प्रधानकर्मणः अङ्गाकांक्षा भवति । एवं "पञ्चप्रयाजाः इज्यन्ते" (मै.सं.४.७.७)इत्यनेन विहितस्य प्रयाजनामकस्य अङ्गस्य प्रधानाकांक्षा भवति । तदा प्रधानस्य अङ्गाकांक्षा अङ्गस्य प्रधानाकांक्षा इति उभयाकांक्षा दृश्यते । सैव उभयाकांक्षा प्रकरणमिति कथ्यते । प्रकरणमिदं महाप्रकरणम् , अवान्तरप्रकरणञ्चेति द्विविधम् । मुख्यभावनासम्बन्धिप्रकरणं महाप्रकरणम् । यथा प्रयाजादीनां दर्शपूर्णमाससम्बन्धः । अङ्गभावनासम्बन्धिप्रकरणम् अवान्तरप्रकरणम् । यथा अभिक्रमणप्रयाजयोः सम्बन्धः।

**7. स्थाननिरूपणम् -**

स्थानं नाम उपस्थितिः। उपस्थितिश्च सन्निधिविशेषः। अनेन प्रमाणेन यस्य समीपे यत् कर्माम्नातं तस्य तदङ्गत्वमवधार्यते । यथा सान्नाय्यपात्रसन्निधौ आम्नातः शुन्धनमन्त्रः । अत एव स मन्त्रः सान्नाय्यपात्रप्रोक्षणाङ्गं भवति सन्निधानात् ।

**8. समाख्यानिरूपणम् -**

समाख्या नाम यौगिकश्शब्दः। सा च वैदिकी लौकिकी इति द्वेधा विभक्ता । वैदिकी यथा हारियोजनः इति । हारियोजनो नाम ग्रहपात्रविशेषः। सा च संज्ञा मन्त्रेण प्राप्ता । स यथा "हरिरसि हारियोजनः"(तै.सं.१.४.२८) इत्यनेन गृह्यमाणो ग्रहः हारियोजन इति वैदिकी समाख्या । लौकिकी च याज्ञिकैः परिकपिता । सा यथा आध्वर्यवमिति । अध्वर्युकर्तृकाणि यानि कर्माणि सन्ति तानि आध्वर्यवपदेन व्यवह्रियन्ते । इति लौकिकी समाख्या ।

**9. प्राबल्यदौर्बल्यविचारः -**

निरूपितेषु षट्सु प्रमाणेषु एतेषाम् एकत्र समवाये प्राबल्यदौर्बल्यविचारः सूत्ररूपेण जैमिनिना एवमुपबृम्हितम् । "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षादिति "(जै.सू.३.३.१४)। विप्रकर्षत्वन्नाम दूरत्वम् । तच्च विप्रकर्षत्वं द्विविधम् । कालकृतं दिक्कृतञ्चेति । अत्र कालकृतं विप्रकर्षत्वं विज्ञेयम् । तच्च कालकृतम् अर्थविप्रकर्षत्वम् । श्रुत्यादीनां एकत्र समावेशे विचार्यमाणे कालकृतविप्रकर्षत्वं भवति इति कृत्वा पारदौर्बल्यमङ्गीक्रियते । लिङ्गादीनां प्रमाणान्तरसापेक्षत्वात् अर्थविप्रकर्षत्वं भवति । अत एव पूर्व पूर्वाणां प्रमाणानां प्राबल्यम् , उत्तरोत्तराणां प्रमाणानां दौर्बल्यञ्च अङ्गीक्रियते । स यथा "ऐन्द्र्या

Received on : 13/09/2021 Accepted on : 27/09/2021 Publication Date: 30/09/2021

गार्हपत्यमुपतिष्ठते"(मै.सं.३.२.४) इत्यत्र इन्द्रसम्बन्धिः ऋक् ऐन्द्री तया इति लिङ्गात् इन्द्रोपस्थानार्थत्वं भवति । गार्हपत्यमिति द्वितीयया श्रुत्या झटिति गार्हपत्याङ्गत्वम् उपस्थीयते । अत एव श्रुतेः प्राबल्यम् अङ्गीक्रियते । सर्वत्र विनियोगस्तु श्रुत्या एव विज्ञेयः ।

**10. उपसंहारः -**

प्रतिपादितानि च षट्प्रमाणानि विनियोगसहकारिभूतानि । शेषत्वं निरूपिते शेषी अनुनिष्पद्यते इति पूर्वमुक्तम् । यथा प्रयाजादीनां शेषत्वाङ्गीकारेण तैः समुचितः सर्वाङ्गविशिष्टः शेषी दर्शपूर्णमासयागः निष्पद्यते इति शेषित्वं प्रत्यासन्नम् ।

**॥ ग्रथने आदृतग्रन्थाः ॥**

१. शाबरभाष्यसहितं मीमांसादर्शनम्, सं-श्रीमन्महा-देव चिमणाजी आपटे, संस्कृतम् देवनागरी, आनन्दाश्रम-प्रेस्, १९३१
२. मीमांसा श्लोकवार्तिकम्, कुमारिलभट्टः, संस्कृतम् देवनागरी, रत्न पब्लिकेशन्स, वाराणसी, २०१३
३. तन्त्रवार्तिकसहितं मीमांसादर्शनम् , सं- विनायक गणेश आपटे, संस्कृतम् देवनागरी, आनन्दाश्रम-प्रेस्, १९३०
४. तन्त्रवार्तिकम्, कुमारिलभट्टः, संस्कृतम् देवनागरी, चौकाम्बा संस्कृत सीरीज, बनारस, १९०३
५. टुप्टीका कुमारिलभट्टः, संस्कृतम् देवनागरी, विद्याविलास प्रेस, बनारस, १९०४
६. मीमांसाकौस्तुभः, खण्डदेवः, संस्कृतम् देवनागरी, चौखम्बा संस्कृत सीरीस आफिस, बनारस, १९२९
७. भाट्टदीपिका, खण्डदेवः, संस्कृतम् देवनागरी, श्री सद्गुरु पब्लिकेशन्स, देहली, १९८७
८. शास्त्रदीपिका, पार्थसारथि-मिश्रः, संस्कृतम् देवनागरी, चौखम्बा कृष्णदास अकाडमि, वाराणसी, २००३
९. भाट्टसंग्रहः, राघ्वेन्द्रयति-सार्वभौमः, संस्कृतम् देवनागरी, द्वैतवेदान्त-ष्टडीस् & रीसर्च् फौन्डेशन् बसवनगुडि, बेङ्गलूरु, २००४
१०. मानमेयोदयः, सं-टि. गणपति शस्त्री, संस्कृतम् देवनागरी,अनन्तशयन संस्कृत ग्रन्थावलिः १९१२
११. भाट्टनयोद्योतःनारायणसुधी, संस्कृतम् देवनागरी, राष्ट्रिय संस्कृत संस्थानम्, २००६
१२. मीमांसान्यायप्रकाशः, आपदेवः, संस्कृतम्देवनागरी, चौकाम्बा संस्कृत संस्थान, वाराणसी, २००८
१३. अर्थसङ्ग्रहः, लौगाक्षिभास्करः, संस्कृतम् देवनागरी, राष्ट्रिय संस्कृत संस्थान, २००२
१४. मीमांसापरिभाषा, कृष्णयज्वा, संस्कृतम् देवनागरी, चौखम्बा कृष्णदास अकादमी, वाराणसी, २००९
१५. मीमांसानयमञ्जरी, पं पट्टाभिराम शास्त्री, संस्कृतम् देवनागरी, सम्पूर्णानन्द संस्कृत युनिवर्सिटि, १९८४

**About the Author:**



Dr. Vigneshwar Bhat currently serves as Assistant Professor in Amrita Darshanam (International Centre for Spiritual Studies), Amrita School of Arts and Sciences in Mysore campus. He obtained his M. A. in Poorvameemamsa Vidwat Uttama with gold medal in 2013 and B.A. in Poorvameemamsa Vidwat Madhyama in 2011 from Maharaja Sanskrit College Mysore. He also obtained M.A. in Sahitya Acharya from Rashtriya Sanskrit Vidyapeetha Tirupati in 2011. He is qualified in UGC National Eligibility Test (NET). He studied śauta, Smārta, Tāntrik and Paurāṇik rituals in Gurukula system. He has PhD on Karma Meemamsa at Karnataka Sanskrit University. He has a keen interest in expanding Indian traditional culture throughout the world and conducting scientific research on Indian scriptures to reveal their effectiveness. He has several books and research papers.